# Pandavagita or Prapannagita

# પાણ્ડવગીતા અથવા પ્રપન્નગીતા

## Document Information

Text title : Pandava Gita

File name : pandavagita.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Anonymous

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Anthology of hymns from Mahabharata, Bhagavata : Vishnu Purana-s

Latest update : May 18, 2006, May 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2023

*sanskritdocuments.org*

# પાણ્ડવગીતા અથવા પ્રપન્નગીતા

પ્રહ્લાદનારદપરાશરપુણ્ડરીક-
    વ્યાસામ્બરીષશુકશૌનકભીષ્મકાવ્યાઃ ।
રુક્માઙ્ગદાર્જુનવસિષ્ઠવિભીષણાદ્યા
    એતાનહં પરમભાગવતાન્ નમામિ ॥ ૧॥

લોમહર્ષણ ઉવાચ ।
ધર્મો વિવર્ધતિ યુધિષ્ઠિરકીર્તનેન
    પાપં પ્રણશ્યતિ વૃકોદરકીર્તનેન ।
શત્રુર્વિનશ્યતિ ધનઞ્જયકીર્તનેન
    માદ્રીસુતૌ કથયતાં ન ભવન્તિ રોગાઃ ॥ ૨॥

બ્રહ્મોવાચ ।
યે માનવા વિગતરાગપરાઽપરજ્ઞા
    નારાયણં સુરગુરું સતતં સ્મરન્તિ ।
ધ્યાનેન તેન હતકિલ્બિષ ચેતનાસ્તે
    માતુઃ પયોધરરસં ન પુનઃ પિબન્તિ ॥ ૩॥

ઇન્દ્ર ઉવાચ ।
નારાયણો નામ નરો નરાણાં
    પ્રસિદ્ધચૌરઃ કથિતઃ પૃથિવ્યામ્ ।
અનેકજન્માર્જિતપાપસઞ્ચયં
    હરત્યશેષં સ્મૃતમાત્ર એવ યઃ ॥ ૪॥

યુધિષ્ઠિર ઉવાચ ।
મેઘશ્યામં પીતકૌશેયવાસં
    શ્રીવત્સાઙ્કં કૌસ્તુભોદ્ભાસિતાઙ્ગમ્ ।
પુણ્યોપેતં પુણ્ડરીકાયતાક્ષં
    વિષ્ણું વન્દે સર્વલોકૈકનાથમ્ ॥ ૫॥

ભીમ ઉવાચ ।
જલૌઘમગ્ના સચરાઽચરા ધરા
    વિષાણકોટ્યાઽખિલવિશ્વમૂર્તિના ।
સમુદ્ધૃતા યેન વરાહરૂપિણા
    સ મે સ્વયમ્ભૂર્ભગવાન્ પ્રસીદતુ ॥ ૬॥

અર્જુન ઉવાચ ।
અચિન્ત્યમવ્યક્તમનન્તમવ્યયં
    વિભું પ્રભું ભાવિતવિશ્વભાવનમ્ ।
ત્રૈલોક્યવિસ્તારવિચારકારકં
    હરિં પ્રપન્નોઽસ્મિ ગતિં મહાત્મનામ્ ॥ ૭॥

નકુલ ઉવાચ ।
યદિ ગમનમધસ્તાત્ કાલપાશાનુબન્ધાદ્
    યદિ ચ કુલવિહીને જાયતે પક્ષિકીટે ।
કૃમિશતમપિ ગત્વા ધ્યાયતે ચાન્તરાત્મા
    મમ ભવતુ હૃદિસ્થા કેશવે ભક્તિરેકા ॥ ૮॥

સહદેવ ઉવાચ ।
તસ્ય યજ્ઞવરાહસ્ય વિષ્ણોરતુલતેજસઃ ।
પ્રણામં યે પ્રકુર્વન્તિ તેષામપિ નમો નમઃ ॥ ૯॥

કુન્તી ઉવાચ ।
સ્વકર્મફલનિર્દિષ્ટાં યાં યાં યોનિં વ્રજામ્યહમ્ ।
તસ્યાં તસ્યાં હૃષીકેશ ત્વયિ ભક્તિર્દૃઢાઽસ્તુ મે ॥ ૧૦॥

માદ્રી ઉવાચ ।
કૃષ્ણે રતાઃ કૃષ્ણમનુસ્મરન્તિ
    રાત્રૌ ચ કૃષ્ણં પુનરુત્થિતા યે ।
તે ભિન્નદેહાઃ પ્રવિશન્તિ કૃષ્ણે
    હવિર્યથા મન્ત્રહુતં હુતાશે ॥ ૧૧॥

દ્રૌપદી ઉવાચ ।
કીટેષુ પક્ષિષુ મૃગેષુ સરીસૃપેષુ
    રક્ષઃપિશાચમનુજેષ્વપિ યત્ર યત્ર ।
જાતસ્ય મે ભવતુ કેશવ ત્વત્પ્રસાદાત્

ત્વય્યેવ ભક્તિરચલાઽવ્યભિચારિણી ચ ॥ ૧૨॥

સુભદ્રા ઉવાચ ।
એકોઽપિ કૃષ્ણસ્ય કૃતઃ પ્રણામો
દશાશ્વમેધાવભૃથેન તુલ્યઃ ।
દશાશ્વમેધી પુનરેતિ જન્મ
કૃષ્ણપ્રણામી ન પુનર્ભવાય ॥ ૧૩॥

અભિમન્યુરુવાચ ।
ગોવિન્દ ગોવિન્દ હરે મુરારે
ગોવિન્દ ગોવિન્દ મુકુન્દ કૃષ્ણ
ગોવિન્દ ગોવિન્દ રથાઙ્ગપાણે ।
ગોવિન્દ ગોવિન્દ નમામિ નિત્યમ્ ॥ ૧૪॥

ધૃષ્ટદ્યુમ્ન ઉવાચ ।
શ્રીરામ નારાયણ વાસુદેવ
ગોવિન્દ વૈકુણ્ઠ મુકુન્દ કૃષ્ણ ।
શ્રીકેશવાનન્ત નૃસિંહ વિષ્ણો
માં ત્રાહિ સંસારભુજઙ્ગદષ્ટમ્ ॥ ૧૫॥

સાત્યકિરુવાચ ।
અપ્રમેય હરે વિષ્ણો કૃષ્ણ દામોદરાઽચ્યુત ।
ગોવિન્દાનન્ત સર્વેશ વાસુદેવ નમોઽસ્તુ તે ॥ ૧૬॥

ઉદ્ધવ ઉવાચ ।
વાસુદેવં પરિત્યજ્ય યોઽન્યં દેવમુપાસતે ।
તૃષિતો જાહ્નવીતીરે કૂપં ખનતિ દુર્મતિઃ ॥ ૧૭॥

ધૌમ્ય ઉવાચ ।
અપાં સમીપે શયનાસનસ્થિતે
દિવા ચ રાત્રૌ ચ યથાધિગચ્છતા ।
યદ્યસ્તિ કિઞ્ચિત્ સુકૃતં કૃતં મયા
જનાર્દનસ્તેન કૃતેન તુષ્યતુ ॥ ૧૮॥

સઞ્જય ઉવાચ ।
આર્તા વિષણ્ણાઃ શિથિલાશ્ચ ભીતા
ઘોરેષુ વ્યાઘ્રાદિષુ વર્તમાનાઃ ।

સઙ્કીર્ત્ય નારાયણશબ્દમાત્રં
    વિમુક્તદુઃખાઃ સુખિનો ભવન્તિ ॥ ૧૯॥

અક્રૂર ઉવાચ ।
અહં તુ નારાયણદાસદાસ-
    દાસસ્ય દાસસ્ય ચ દાસદાસઃ ।
અન્યો ન હીશો જગતો નરાણાં
    તસ્માદહં ધન્યતરોઽસ્મિ લોકે ॥ ૨૦॥

વિરાટ ઉવાચ ।
વાસુદેવસ્ય યે ભક્તાઃ શાન્તાસ્તદ્ગતચેતસઃ ।
તેષાં દાસસ્ય દાસોઽહં ભવેયં જન્મજન્મનિ ॥ ૨૧॥

ભીષ્મ ઉવાચ ।
વિપરીતેષુ કાલેષુ પરિક્ષીણેષુ બન્ધુષુ ।
ત્રાહિ માં કૃપયા કૃષ્ણ શરણાગતવત્સલ ॥ ૨૨॥

દ્રોણ ઉવાચ ।
યે યે હતાશ્ચક્રધરેણ દૈત્યાં-
        સ્ત્રૈલોક્યનાથેન જનાર્દનેન ।
તે તે ગતા વિષ્ણુપુરીં પ્રયાતાઃ
        ક્રોધોઽપિ દેવસ્ય વરેણ તુલ્યઃ ॥ ૨૩॥

કૃપાચાર્ય ઉવાચ ।
મજ્જન્મનઃ ફલમિદં મધુકૈટભારે
    મત્પ્રાર્થનીય મદનુગ્રહ એષ એવ ।
ત્વદ્ભૃત્યભૃત્યપરિચારકભૃત્યભૃત્ય-
    ભૃત્યસ્ય ભૃત્ય ઇતિ માં સ્મર લોકનાથ ॥ ૨૪॥

અશ્વત્થામ ઉવાચ ।
ગોવિન્દ કેશવ જનાર્દન વાસુદેવ
    વિશ્વેશ વિશ્વ મધુસૂદન વિશ્વરૂપ ।
શ્રીપદ્મનાભ પુરુષોત્તમ દેહિ દાસ્યં
    નારાયણાચ્યુત નૃસિંહ નમો નમસ્તે ॥ ૨૫॥

કર્ણ ઉવાચ ।
નાન્યં વદામિ ન શ‍ૃણોમિ ન ચિન્તયામિ

નાન્યં સ્મરામિ ન ભજામિ ન ચાશ્રયામિ ।
ભક્ત્યા ત્વદીયચરણામ્બુજમાદરેણ
શ્રીશ્રીનિવાસ પુરુષોત્તમ દેહિ દાસ્યમ્ ॥ ૨૬॥

ધૃતરાષ્ટ્ર ઉવાચ ।
નમો નમઃ કારણવામનાય
નારાયણાયામિતવિક્રમાય ।
શ્રીશાર્ઙ્ગચક્રાસિગદાધરાય
નમોઽસ્તુ તસ્મૈ પુરુષોત્તમાય ॥ ૨૭॥

ગાન્ધારી ઉવાચ ।
ત્વમેવ માતા ચ પિતા ત્વમેવ
ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ
ત્વમેવ સર્વં મમ દેવ દેવ ॥ ૨૮॥

દ્રુપદ ઉવાચ ।
યજ્ઞેશાચ્યુત ગોવિન્દ માધવાનન્ત કેશવ ।
કૃષ્ણ વિષ્ણો હૃષીકેશ વાસુદેવ નમોઽસ્તુ તે ॥ ૨૯॥

જયદ્રથ ઉવાચ ।
નમઃ કૃષ્ણાય દેવાય બ્રહ્મણેઽનન્તશક્તયે ।
યોગેશ્વરાય યોગાય ત્વામહં શરણં ગતઃ ॥ ૩૦॥

વિકર્ણ ઉવાચ ।
કૃષ્ણાય વાસુદેવાય દેવકીનન્દનાય ચ ।
નન્દગોપકુમારાય ગોવિન્દાય નમો નમઃ ॥ ૩૧॥

વિરાટ ઉવાચ ।
નમો બ્રહ્મણ્યદેવાય ગોબ્રાહ્મણહિતાય ચ ।
જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમો નમઃ ॥ ૩૨॥

શલ્ય ઉવાચ ।
અતસીપુષ્પસઙ્કાશં પીતવાસસમચ્યુતમ્ ।
યે નમસ્યન્તિ ગોવિન્દં તેષાં ન વિદ્યતે ભયમ્ ॥ ૩૩॥

બલભદ્ર ઉવાચ ।

કૃષ્ણ કૃષ્ણ કૃપાલો ત્વમગતીનાં ગતિર્ભવ ।
સંસારાર્ણવમગ્નાનાં પ્રસીદ પુરુષોત્તમ ॥ ૩૪॥

શ્રીકૃષ્ણ ઉવાચ ।
કૃષ્ણ કૃષ્ણેતિ કૃષ્ણેતિ યો માં સ્મરતિ નિત્યશઃ ।
જલં ભિત્વા યથા પદ્મં નરકાદુદ્ધરામ્યહમ્ ॥ ૩૫॥

શ્રીકૃષ્ણ ઉવાચ ।
નિત્યં વદામિ મનુજાઃ સ્વયમૂર્ધ્વબાહુ-
    ર્યો માં મુકુન્દ નરસિંહ જનાર્દનેતિ ।
જીવો જપત્યનુદિનં મરણે રણે વા
    પાષાણકાષ્ઠસદૃશાય દદામ્યભીષ્ટમ્ ॥ ૩૬॥

ઈશ્વર ઉવાચ ।
સકૃન્નારાયણેત્યુક્ત્વા પુમાન્ કલ્પશતત્રયમ્ ।
ગઙ્ગાદિસર્વતીર્થેષુ સ્નાતો ભવતિ પુત્રક ॥ ૩૭॥

સૂત ઉવાચ ।
તત્રૈવ ગઙ્ગા યમુના ચ તત્ર
    ગોદાવરી સિન્ધુ સરસ્વતી ચ ।
સર્વાણિ તીર્થાનિ વસન્તિ તત્ર
    યત્રાચ્યુતોદાર કથાપ્રસઙ્ગઃ ॥ ૩૮॥

યમ ઉવાચ ।
નરકે પચ્યમાનં તુ યમેનં પરિભાષિતમ્ ।
કિં ત્વયા નાર્ચિતો દેવઃ કેશવઃ ક્લેશનાશનઃ ॥ ૩૫॥

નારદ ઉવાચ ।
જન્માન્તરસહસ્રેણ તપોધ્યાનસમાધિના ।
નરાણાં ક્ષીણપાપાનાં કૃષ્ણે ભક્તિઃ પ્રજાયતે ॥ ૪૦॥

પ્રહ્લાદ ઉવાચ ।
નાથ યોનિસહસ્રેષુ યેષુ યેષુ વ્રજામ્યહમ્ ।
તેષુ તેષ્વચલા ભક્તિરચ્યુતાऽસ્તુ સદા ત્વયિ ॥ ૪૧॥

યા પ્રીતિરવિવેકનાં વિષયેષ્વનપાયિનિ ।
ત્વામનુસ્મરતઃ સા મે હૃદયાન્માऽપસર્પતુ ॥ ૪૨॥

વિશ્વામિત્ર ઉવાચ ।
કિં તસ્ય દાનૈઃ કિં તીર્થૈઃ કિં તપોભિઃ કિમધ્વરૈઃ ।
યો નિત્યં ધ્યાયતે દેવં નારાયણમનન્યધીઃ ॥ ૪૩॥

જમદગ્નિરુવાચ ।
નિત્યોત્સવો ભવેત્તેષાં નિત્યં નિત્યં ચ મઙ્ગલમ્ ।
યેષાં હૃદિસ્થો ભગવાન્મઙ્ગલાયતનં હરિઃ ॥ ૪૪॥

ભરદ્વાજ ઉવાચ ।
લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાજયઃ ।
યેષામિન્દીવરશ્યામો હૃદયસ્થો જનાર્દનઃ ॥ ૪૫॥

ગૌતમ ઉવાચ ।
ગોકોટિદાનં ગ્રહણેષુ કાશી-
    પ્રયાગગઙ્ગાયુતકલ્પવાસઃ ।
યજ્ઞાયુતં મેરુસુવર્ણદાનં
    ગોવિન્દનામસ્મરણેન તુલ્યમ્ ॥ ૪૬॥

અગ્નિરુવાચ ।
ગોવિન્દેતિ સદા સ્નાનં ગોવિન્દેતિ સદા જપઃ ।
ગોવિન્દેતિ સદા ધ્યાનં સદા ગોવિન્દકીર્તનમ્ ॥ ૪૭॥

ત્ર્યક્ષરં પરમં બ્રહ્મ ગોવિન્દ ત્ર્યક્ષરં પરમ્ ।
તસ્માદુચ્ચારિતં યેન બ્રહ્મભૂયાય કલ્પતે ॥ ૪૮॥

વેદવ્યાસ ઉવાચ ।
અચ્યુતઃ કલ્પવૃક્ષોઽસાવનન્તઃ કામધેનુ વૈ ।
ચિન્તામણિસ્તુ ગોવિન્દો હરેર્નામ વિચિન્તયેત્ ॥ ૪૯॥

ઇન્દ્ર ઉવાચ ।
જયતુ જયતુ દેવો દેવકીનન્દનોઽયં
    જયતુ જયતુ કૃષ્ણો વૃષ્ણિવંશપ્રદીપઃ ।
જયતુ જયતુ મેઘશ્યામલઃ કોમલાઙ્ગો
    જયતુ જયતુ પૃથ્વીભારનાશો મુકુન્દઃ ॥ ૫૦॥

પિપ્પલાયન ઉવાચ ।
શ્રીમન્નૃસિંહવિભવે ગરુડધ્વજાય

તાપત્રયોપશમનાય ભવૌષધાય ।
કૃષ્ણાય વૃશ્ચિકજલાગ્નિભુજઙ્ગરોગ-
ક્લેશવ્યયાય હરયે ગુરવે નમસ્તે ॥ ૫૧॥

આવિર્હોત્ર ઉવાચ ।
કૃષ્ણ ત્વદીયપદપઙ્કજપઞ્જરાન્તે
અદ્યૈવ મે વિશતુ માનસરાજહંસઃ ।
પ્રાણપ્રયાણસમયે કફવાતપિત્તૈઃ
કણ્ઠાવરોધનવિધૌ સ્મરણં કુતસ્તે ॥ ૫૨॥

વિદુર ઉવાચ ।
હરેર્નામૈવ નામૈવ નામૈવ મમ જીવનમ્ ।
કલૌ નાસ્ત્યેવ નાસ્ત્યેવ નાસ્ત્યેવ ગતિરન્યથા ॥ ૫૩॥

વસિષ્ઠ ઉવાચ ।
કૃષ્ણેતિ મઙ્ગલં નામ યસ્ય વાચિ પ્રવર્તતે ।
ભસ્મીભવન્તિ તસ્યાશુ મહાપાતકકોટયઃ ॥ ૫૪॥

અરુન્ધત્યુવાચ ।
કૃષ્ણાય વાસુદેવાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય ગોવિન્દાય નમો નમઃ ॥ ૫૫॥

કશ્યપ ઉવાચ ।
કૃષ્ણાનુસ્મરણાદેવ પાપસઙ્ઘટ્ટપઞ્જરમ્ ।
શતધા ભેદમાપ્નોતિ ગિરિર્વજ્રહતો યથા ॥ ૫૬॥

દુર્યોધન ઉવાચ ।
જાનામિ ધર્મં ન ચ મે પ્રવૃત્તિ-
ર્જાનામિ પાપં ન ચ મે નિવૃત્તિઃ ।
કેનાપિ દેવેન હૃદિ સ્થિતેન
યથા નિયુક્તોઽસ્મિ તથા કરોમિ ॥ ૫૭॥

યન્ત્રસ્ય મમ દોષેણ ક્ષમ્યતાં મધુસૂદન ।
અહં યન્ત્રં ભવાન્ યન્ત્રી મમ દોષો ન દીયતામ્ ॥ ૫૮॥

ભૃગુરુવાચ ।
નામૈવ તવ ગોવિન્દ નામ ત્વત્તઃ શતાધિકમ્ ।

દદાત્યુચ્ચારણાન્મુક્તિઃ ભવાનષ્ટાઙ્ગયોગતઃ ॥ ૫૯॥

લોમશ ઉવાચ ।
નમામિ નારાયણ પાદપઙ્કજં
    કરોમિ નારાયણપૂજનં સદા ।
વદામિ નારાયણનામ નિર્મલં
    સ્મરામિ નારાયણતત્ત્વમવ્યયમ્ ॥ ૬૦॥

શૌનક ઉવાચ ।
સ્મૃતેઃ સકલકલ્યાણં ભજનં યસ્ય જાયતે ।
પુરુષં તમજં નિત્યં વ્રજામિ શરણં હરિમ્ ॥ ૬૧॥

ગર્ગ ઉવાચ ।
નારાયણેતિ મન્ત્રોઽસ્તિ વાગસ્તિ વશવર્તિની ।
તથાપિ નરકે ઘોરે પતન્તીત્યદ્ભુતં મહત્ ॥ ૬૨॥

દાલ્ભ્ય ઉવાચ ।
કિં તસ્ય બહુભિર્મન્ત્રૈર્ભક્તિર્યસ્ય જનાર્દને ।
નમો નારાયણાયેતિ મન્ત્રઃ સર્વાર્થસાધાકે ॥ ૬૩॥

વૈશમ્પાયન ઉવાચ ।
યત્ર યોગેશ્વરઃ કૃષ્ણો યત્ર પાર્થો ધનુર્ધરઃ ।
તત્ર શ્રીર્વિજયો ભૂતિર્ધ્રુવા નીતિર્મતિર્મમ ॥ ૬૪॥

અગ્નિરુવાચ ।
હરિર્હરતિ પાપાનિ દુષ્ટચિત્તૈરપિ સ્મૃતઃ ।
અનિચ્છયાપિ સંસ્પૃષ્ટો દહત્યેવ હિ પાવકઃ ॥ ૬૫॥

પરમેશ્વર ઉવાચ ।
સકૃદુચ્ચરિતં યેન હરિરિત્યક્ષરદ્વયમ્ ।
લબ્ધઃ પરિકરસ્તેન મોક્ષાય ગમનં પ્રતિ ॥ ૬૬॥

પુલસ્ત્ય ઉવાચ ।
હે જિહ્વે રસસારજ્ઞે સર્વદા મધુરપ્રિયે ।
નારાયણાખ્યપીયૂષં પિબ જિહ્વે નિરન્તરમ્ ॥ ૬૭॥

વ્યાસ ઉવાચ ।
સત્યં સત્યં પુનઃ સત્યં સત્યં સત્યં વદામ્યહમ્ ।

નાસ્તિ વેદાત્પરં શાસ્ત્રં ન દેવઃ કેશવાત્પરઃ ॥ ૬૮॥

ધન્વન્તરિરુવાચ ।
અચ્યુતાનન્ત ગોવિન્દ નામોચ્ચારણભેષજાત્ ।
નશ્યન્તિ સકલા રોગાઃ સત્યં સત્યં વદામ્યહમ્ ॥ ૬૯॥

માર્કણ્ડેય ઉવાચ ।
સ્વર્ગદં મોક્ષદં દેવં સુખદં જગતો ગુરુમ્ ।
કથં મુહુર્તમપિ તં વાસુદેવં ન ચિન્તયેત્ ॥ ૭૦॥

અગસ્ત્ય ઉવાચ ।
નિમિષં નિમિષાર્ધં વા પ્રાણિનાં વિષ્ણુચિન્તનમ્ ।
તત્ર તત્ર કુરુક્ષેત્રં પ્રયાગો નૈમિષં વરમ્ ॥ ૭૧॥

વામદેવ ઉવાચ ।
નિમિષં નિમિષાર્ધં વા પ્રાણિનાં વિષ્ણુચિન્તનમ્ ।
કલ્પકોટિસહસ્રાણિ લભતે વાઞ્છિતં ફલમ્ ॥ ૭૨॥

શુક ઉવાચ ।
આલોડ્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ ।
ઇદમેકં સુનિષ્પન્નં ધ્યેયો નારાયણઃ સદા ॥ ૭૩॥

શ્રીમહાદેવ ઉવાચ ।
શરીરે જર્જરીભૂતે વ્યાધિગ્રસ્તે કલેવરે ।
ઔષધં જાહ્નવીતોયં વૈદ્યો નારાયણો હરિઃ ॥ ૭૪॥

શૌનક ઉવાચ ।
ભોજનાચ્છાદને ચિન્તાં વૃથા કુર્વન્તિ વૈષ્ણવાઃ ।
યોઽસૌ વિશ્વમ્ભરો દેવઃ સ કિં ભક્તાનુપેક્ષતે ॥ ૭૫॥

સનત્કુમાર ઉવાચ ।
યસ્ય હસ્તે ગદા ચક્રં ગરુડો યસ્ય વાહનમ્ ।
શઙ્ખચક્રગદાપદ્મી સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૭૬॥

એવં બ્રહ્માદયો દેવા ઋષયશ્ચ તપોધનાઃ ।
કીર્તયન્તિ સુરશ્રેષ્ઠમેવં નારાયણં વિભુમ્ ॥ ૭૭॥

ઇદં પવિત્રમાયુષ્યં પુણ્યં પાપપ્રણાશનમ્ ।
દુઃસ્વપ્નનાશનં સ્તોત્રં પાણ્ડવૈઃ પરિકીર્તિતમ્ ॥ ૭૮॥

યઃ પઠેત્પ્રાતરુત્થાય શુચિસ્તદ્ગતમાનસઃ ।
ગવાં શતસહસ્રસ્ય સમ્યગ્દત્તસ્ય યત્ફલમ્ ॥ ૭૯॥

તત્ફલં સમવાપ્નોતિ યઃ પઠેદિતિ સંસ્તવમ્ ।
સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૮૦॥

ગઙ્ગા ગીતા ચ ગાયત્રી ગોવિન્દો ગરુડધ્વજઃ ।
ગકારૈઃ પઞ્ચભિર્યુક્તઃ પુનર્જન્મ ન વિદ્યતે ॥ ૮૧॥

ગીતાં યઃ પઠતે નિત્યં શ્લોકાર્ધં શ્લોકમેવ વા ।
મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૮૨॥

ઇતિ પાણ્ડવગીતા અથવા પ્રપન્નગીતા સમાપ્તા ।

ૐ તત્સત્ ।

Reference - Anthology compiled from Mahabharata,
Bhagavata, and Vishnu Purana
by an Anonymous writer.
Publ.: V. Rajagopal Bhat - 1970;
Publications Committee,
Shri Chitrapur Math, Shirali
http://www.chitrapurmath.net/bookstm

Encoded and proofread by Sunder Hattangadi

*Pandavagita or Prapannagita*
pdf was typeset on April 18, 2023

Please send corrections to *sanskrit@cheerful.com*